# Sadashivaproktam Shivalingadanavidhyopadesham

# સદાશિવપ્રોક્તં શિવલિઙ્ગદાનવિધ્યોપદેશમ્

## Document Information

Text title : Sadashivaproktam Shivalingadanavidhyopadesham

File name : sadAshivaproktaMshivalingadAnavidhyopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam | 691-713||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 17, 2024

*sanskritdocuments.org*

# સદાશિવપ્રોક્તં શિવલિઙ્ગદાનવિધ્યોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
(શિવપાર્વતીસંવદે)
પાર્વતી ઉવાચ
દેવ દેવ મહાદેવ લિઙ્ગદાનવિધિં વદ ।
લિઙ્ગદાનફલં ચાપિ વદ મહ્યં કૃપાનિધે ॥ ૬૯૧॥

શ્રીસદાશિવઃ (ઉવાચ)
કાશ્મીરકાઞ્ચનાદીનિ લિઙ્ગાનિ વિવિધાન્યપિ ।
દેયાન્યનન્તયત્નેન મત્પ્રીત્યર્થં મુમુક્ષુભિઃ ॥ ૬૯૨॥

શૈવેભ્ય એવ દેયાનિ સર્વદાનાનિ સર્વદા ।
જ્વલન્તમગ્નિમુત્સૃજ્ય ન હિ ભસ્મનિ હૂયતે ॥ ૬૯૩॥

અત્યલ્પમપિ દત્તં યદ્યસ્મિન્નક્ષય્યમમ્બિકે ।
તાદૃશઃ શૈવ એવાતો દાનં શૈવાય દીયતે ॥ ૬૯૪॥

શિવરાત્રૌ સોમવારે ગ્રહણે ચન્દ્રસૂર્યયોઃ ।
સઙ્ક્રાન્તિષ્વપિ કર્તવ્યં લિઙ્ગદાનં મુમુક્ષુભિઃ ॥ ૬૯૮॥

ઉપોષ્ય પૂર્વદિવસે શૈવાન્સમ્પૂજ્ય સાદરમ્ ।
પ્રાર્થનીયાસ્તદા શૈવા લિઙ્ગદાનાર્થમાદરાત્ ॥ ૬૯૬॥

તતો લિઙ્ગામિ દેયાનિ ક્ષીરાજ્યૈર્વિધિપૂર્વકમ્ ।
અભિષિચ્યાર્ચનીયાનિ બિલ્વપત્રાદિભિઃ શિવે ॥ ૬૯૭॥

સૌવર્ણે રાજતે વાપિ તામ્રે વા ભાજને નવે ।
નવવસ્ત્રસમાસ્તીર્ણે શિવલિઙ્ગં નિવેદયેત્ ॥ ૬૯૮॥

તતઃ પુનઃ પ્રયત્નેન ભસ્મબિલ્વદલાદિભિઃ ।
સમ્પૂજ્ય ક્ષીરપક્વાન્નૈર્નૈવેદ્યાનિ સમર્પયેત્ ॥ ૬૯૯॥

રાત્રૌ જાગરણં કાર્યં ભક્તિશ્રદ્ધાપુરઃસરમ્ ।
કથા મદીયા શ્રોતવ્યા મૂર્તિધ્યાનપુરઃસરમ્ ॥ ૭૦૦॥

પ્રદક્ષિણાપિ કર્તવ્યા સપુષ્પાઞ્જલિ શઙ્કરિ ।
નૈવેદ્યં દેયમમલં મહ્યં યામચતુષ્ટયે ॥ ૭૦૧॥

તતઃ પ્રાતઃ સમુત્થાય કૃત્વા સ્નાનાદિકં તતઃ ।
શૈવાનાં પૂજનં કાર્યં મધુપર્કપુરઃસરમ્ ॥ ૭૦૨॥

તતઃ સુવર્ણસહિતં વસ્ત્રયુગ્મસમન્વિતમ્ ।
ગ્રાહ્યં સપાત્રં હસ્તેન શિવલિઙ્ગં મદાત્મકમ્ ॥ ૭૦૩॥

તતઃ પરમયં મન્ત્રો મન્મૂર્તિધ્યાનપૂર્વકમ્ ।
દેશકાલાદિ સઙ્કીર્ત્ય પઠનીયો મનીષિભિઃ ॥ ૭૦૪॥

શિવલિઙ્ગે શિવાકારે ભુવનાનિ ચતુર્દશ ।
તસ્માદસ્ય પ્રદાનેન પ્રીયતાં ભગવાઞ્છિવઃ ॥ ૭૦૫॥

ઇતિ મન્ત્રં સમુચ્ચાર્ય શિવલિઙ્ગં મદાત્મકમ્ ।
મદ્ભક્તાય પ્રદાતવ્યં જલદાનપુરઃસરમ્ ॥ ૭૦૬॥

દેવસ્ય ત્વેતિ રાજાત્વેત્યેતિ મન્ત્રાસ્તતઃપરમ્ ।
પ્રતિગૃહીત્વા(પ્રતિગૃહ્ય પ્ર)યત્નેન પઠનીયા યથાક્રમમ્ ॥ ૭૦૭॥

દક્ષિણા તાવતી દેયા તૃપ્તિર્ભવતિ યાવતા ।
સુવર્ણાનાં સહસ્રં વા યદ્વા દેયા સ્વશક્તિતઃ ॥ ૭૦૮॥

દશદાનાનિ કાર્યાણિ તતઃ શક્ત્યનુસારતઃ ।
તતઃ કાર્યં કૃતં કર્મ શિવે સર્વં મદર્પણમ્ ॥ ૭૦૯॥

એવં યઃ કુરુતે ભક્ત્યા લિઙ્ગદાનં યથાવિધિ ।
સ મહાપાપસઙ્ઘેભ્યઃ સદ્ય એવ પ્રમુચ્યતે ॥ ૭૧૦॥

યં યમર્થં સમુદ્દિશ્ય લિઙ્ગદાનં કરોતિ યઃ ।
સ તં તમર્થમાપ્નોતિ મત્પ્રસાદાન્મનોરમે ॥ ૭૧૧॥

લિઙ્ગદાનસમં દાનં નાસ્તિ કુત્રાપિ શૈલજે ।
લિઙ્ગદાનં મહાદાનં સર્વદાનોત્તમોત્તમમ્ ॥ ૭૧૨॥

લિઙ્ગદાનં મહાદાનં મદનુગ્રહકારણમ્ ।
યઃ કરોતિ વિધાનેન સ મમાતિપ્રિયઃ શિવે ॥ ૭૧૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપાર્વતીસંવદે સદાશિવપ્રોક્તં શિવલિઙ્ગદાનવિધ્યોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૯ શિવગૌરીસંવાદે કાશીપ્રભાવકથનમ્ । ૬૯૧-૭૧૩ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam . 691-713..

Notes:
Śiva શિવ tells Pārvatī પાર્વતી about the Śivaliṅgadānavidhi શિવલિઙ્ગદાનવિધિ and that such Śivaliṅga શિવલિઙ્ગ may be composed of various materials like Kāśmīra કાશ્મીર, Kāñcana કાઞ્ચન etc. He mentions that the procedure can be conducted especially during Śivaṛatri શિવરાત્રિ, Somavāra સોમવાર, Sūrya Grahaṇa સૂર્ય ગ્રહણ, Candra grahaNa ચન્દ્ર ગ્રહણ and Saṅkrānti સઙ્ક્રાન્તિ.

Proofread by Ruma Dewan

---

*Sadashivaproktam Shivalingadanavidhyopadesham*
pdf was typeset on June 17, 2024

Please send corrections to *sanskrit@cheerful.com*